## Śhivōpāsanā Mantrāḥa

[KYV – TA 10-16-1 to 10-25-1]

ॐ नि॒धन॑पतये॒ नमः ॥१॥ नि॒धन॑पतान्तिकाय॒ नमः ॥२॥

ॐ nidhanapatayē namaḥa || 1 ||

nidhanapatān’tikāya namaḥa || 2 ||

ऊर्ध्वा॑य॒ नमः ॥३॥ ऊर्ध्व॑लिङ्गाय॒ नमः ॥४॥

ūrdh’vāya namaḥa || 3 || ūrdh’valiṅ’gāya namaḥa || 4 ||

हिरण्याय॒ नमः ॥५॥ हिरण्यलिङ्गाय॒ नमः ॥६॥

hiraṇ’yāya namaḥa || 5 || hiraṇ’yaliṅ’gāya namaḥa || 6 ||

सुवर्णा॑य॒ नमः ॥७॥ सुवर्ण॑लिङ्गाय॒ नमः ॥८॥

suvar’ṇāya namaḥa || 7 || suvar’ṇaliṅ’gāya namaḥa || 8 ||

दिव्याय॒ नमः ॥९॥ दिव्यलिङ्गाय॒ नमः ॥१०॥

div’yāya namaḥa || 9 || div’yaliṅ’gāya namaḥa || 10 ||

भवाय॒ नमः ॥११॥ भवलिङ्गाय॒ नमः ॥१२॥

bhavāya namaḥa || 11 || bhavaliṅ’gāya namaḥa || 12 ||

शर्वा॑य॒ नमः ॥१३॥ शर्व॑लिङ्गाय॒ नमः ॥१४॥

śhar’vāya namaḥa || 13 || śhar’valiṅ’gāya namaḥa || 14 ||

शिवाय॒ नमः ॥१५॥ शिवलिङ्गाय॒ नमः ॥१६॥

śhivāya namaḥa || 15 || śhivaliṅ’gāya namaḥa || 16 ||

ज्वलाय॒ नमः ॥१७॥ ज्वललिङ्गाय॒ नमः ॥१८॥

jvalāya namaḥa || 17 || jvalaliṅ’gāya namaḥa || 18 ||

आत्माय॒ नमः ॥१९॥ आत्मलिङ्गाय॒ नमः ॥२०॥

āt’māya namaḥa || 19 || āt’maliṅ’gāya namaḥa || 20 ||

परमाय॒ नमः ॥२१॥ परमलिङ्गाय॒ नमः ॥२२॥

paramāya namaḥa || 21 || paramaliṅ’gāya namaḥa || 22 ||

www.sanvead.net

एतथ्सोमस्यं सूर्यस्य सर्वलिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम् ॥२३॥

ētath'sōmas'ya sūr'yas'ya sar'valiṅ'gag'ges' sthāpayati
pāṇiman'tram' pavit'ram ॥ 23 ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवेभवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥२४॥

sad'yōjātam' prapad'yāmi
sad'yōjātāya vai namō namaḥa ।
bhavē bhavē nātibhavē bhavas'va mām ।
bhavōd'bhavāya namaḥa ॥ 24 ॥

वामदेवाय नमो ॥२५॥ ज्येष्ठाय नमश् ॥२६॥
श्रेष्ठाय नमो ॥२७॥ रुद्राय नमः ॥२८॥
कालाय नमः ॥२९॥ कलविकरणाय नमो ॥३०॥
बलविकरणाय नमो ॥३१॥ बलाय नमो ॥३२॥
बलप्रमथनाय नमस् ॥३३॥ सर्वभूतदमनाय नमो ॥३४॥
मनोन्मनाय नमः ॥३५॥

vāmadēvāya namōōj' ॥ 25 ॥ jyēṣh'ṭhāya namaśh' ॥ 26 ॥
śhrēṣh'ṭhāya namō ॥ 27 ॥ rud'rāya nama[hk]' ॥ 28 ॥
kālāya nama[hk]' ॥ 29 ॥ kalavikaraṇāya namō ॥ 30 ॥
balavikaraṇāya namō ॥ 31 ॥ balāya namō ॥ 32 ॥
balap'ramathanāya namas' ॥ 33 ॥
sar'vabhūta damanāya namō ॥ 34 ॥
manōn'manāya namaḥa ॥ 35 ॥

अघोरे॑भ्योऽथ घोरे॑भ्यो घोरघोर॑तरेभ्यः ।
सर्वे॑भ्यस्सर्व शर्वे॑भ्यो नम॑स्ते , अस्तु रुद्ररू॑पेभ्यः ॥३६॥

aghōrēēbh'yō (a)tha ghōrēēbh'yō
ghōraghōratarēbh'yaḥa |
sar'vēēbh'yas' sar'vaśhar'vēēbh'yō namas'tē ,
as'tu rud'rarūpēbh'yaḥa || 36 ||

तत्पुरु॑षाय विद्महे॑ महादेवाय॑ धीमहि । तन्नो॑ रुद्रः प्रचोदया॑त् ॥३७॥

tat'puruṣhāya vid'mahē mahādēvāya dhīmahi |
tan'nō rud'ra[fp]' prachōdayāāte || 37 ||

ईशानस्सर्व॑विद्यानामीश्वरस्सर्व॑भूतानां ब्रम्हाधि॑पतिर्ब्रम्हणोऽधि॑पतिर्ब्रम्हा॑
शिवो मे॑ , अस्तु सदाशिवोम् ॥३८॥

īśhānas' sar'vavid'yānāmīśh'varas' sar'vabhūtānām'
bram'hādhipatir' bram'haṇō (a)dhipatir'
bram'hā śhivō mē , as'tu sadāśhivōm || 38 ||

नमो हिरण्यबाहवे हिरण्यवर्णा॑य हिरण्यरूपाय
हिरण्यपतयेऽम्बिकापतय ,
उमा॑पतये पशुपतये॑ नमो नमः ॥३९॥

namō hiraṇ'yabāhavē hiraṇ'yavar'ṇāya hiraṇ'yarūpāya
hiraṇ'yapatayē (a)m'bikāpataya ,
umāpatayē paśhupatayē namō namaḥa || 39 ||

ऋतꣳ स॒त्यं प॑रं ब्र॒म्ह पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम् ।
ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं वि॒श्वरू॑पाय॒ वै नमो॒ नमः॑ ॥४०॥

ṛtagm' sat'yam' param'
bram'ha purushaṅ' kṛṣh'ṇapiṅ'galam |
ūrdh'varētaṁ' virūpāk'ṣhaṁ'
viśh'varūpāya vai namō namaḥa || 40 ||

सर्वो॒ वै रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ , अस्तु । पुरु॑षो॒ वै रु॒द्रस्सन्म॒हो नमो॒ नमः॑ ।

sar'vō vai rud'ras'tas'mai rud'rāya namō , as'tu |
purushō vai rud'ras' san'mahō namō namaḥa |

विश्वं॑ भू॒तं भुव॑नं चि॒त्रं ब॑हु॒धा जा॒तं जाय॑मानं॒ च॒ यत् ।
सर्वो॒ ह्येष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ , अस्तु ॥४१॥

viśh'vam' bhūtam' bhuvanañ' chit'ram' bahudhā
jātañ' jāyamānañ' cha yate |
sar'vōh' hyēṣha rud'ras'tas'mai
rud'rāya namō , as'tu || 41 ||

कद्रु॒द्राय॒ प्रचे॑तसे मी॒ढुष्ट॑माय॒ तव्य॑से । वो॒चेम॒ शंत॑मꣳ हृ॒दे ।
सर्वो॒ ह्येष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ , अस्तु ॥४२॥

kad'rud'rāyap' prachētasē mīḍhuṣh'ṭamāya tav'yasē |
vōchēma śhan'tamagm' hṛdē |
sar'vōh' hyēṣha rud'ras'tas'mai
rud'rāya namō , as'tu || 42 ||

ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||